# रूपकालङ्कारनिरूपणे प्राचीन-नव्यमतयोः तुलनात्मकं विवेचनम्

**डॉ रत्नाकर-खुण्टिआ**

**अध्यापकः, नीलगिरिसंस्कृतमहाविद्यालयः**

**राजनीलगिरिः, बालासोरः, ओडिशा, ७५६०४०**

सामान्यतः रूपयतीति रूपकम् इति व्युत्पत्त्या उपमेयस्य रूपणकर्तृ= रूपवत्त्वसम्पादकमुपमानं रूपकमित्यन्वर्थं नाम। एवञ्च उपमेये उपमानतादात्म्यवर्णनं रूपकमिति सामान्यतो रूपकस्वरूपकम्। निष्कृष्टं रूपकलक्षणं तु पण्डितराजेनेत्थं प्रत्यपादि –

**“**उपमेयतावच्छेदकधर्मपुरस्कारेणोपमेये शब्दान्निश्चीयमानमुपमानतादात्म्यं रूपकं तदेव चोपस्कारकत्वविशिष्टमलङ्कारः॥”[1]

इदञ्च रूपकलक्षणं तादात्म्यघटितम्, सर्वालङ्कारिकलक्षणापेक्षया जागरूकतया प्रतिपादितञ्च लक्षणम्। लक्षणेऽस्मिन् वैशिष्ट्यस्य परिज्ञानाय पण्डितराजपूर्ववर्तिनां प्राचीनानां नवीनानां लक्षणानि लेशतस्समाकलनीयानि।

**प्राचीननवीनालङ्कारिकोक्तानि रूपकलक्षणानि –**

रूपकलक्षणनिरूपणे च प्राचीननवीनयोः प्रधानतया पञ्च प्रकाराः दृश्यन्ते। तत्र –

१. उपमेये उपमानाभेदो रूपकमित्येका सरणिः।

२. तत्राप्यभेदप्रतिपत्तौ आरोपमर्यादा अध्यवसानमर्यादा चेति प्रकारद्वयसम्भवात् आरोपमर्यादयाऽभेदप्रतिपत्तिरिति स्पष्टीकरणायारोपपदमन्तर्भाव्य रूपकलक्षणकथनम् इति द्वितीया सरणिः।

३. **मुखं चन्द्रः** इत्यादौ रूपके नामार्थयोरभेदान्वयस्यैव वक्तव्यतया मुखे चन्द्राभेदस्य च बाधितत्त्वात् रूपके लक्षणा अङ्गीकार्या। एवं लक्षणावृत्तिमन्तर्भाव्य रूपकलक्षणप्रतिपादनसरणिस्तृतीया।

४. सादृश्यासम्बद्धे केवले विषयेऽपि विषयिणः आरोपे रूपकमिति चतुर्थी सरणिः।

५. विषये अथवा उपमेये विषयिणः अथवा उपमानस्य तादूप्यं दृष्टौ निक्षिप्य लक्षणकथनसरणिः पञ्चमी।

एतेषां पञ्चप्रकाराणां क्वचिदेतदन्यतमप्रकारसाङ्कर्येण लक्षणनिरूपणमपि प्रचलति। तदेवमत्र पञ्चप्रकाराः। यथा-

१. अभेदघटितानि लक्षणानि।

२. आरोपघटितानि लक्षणानि।

३. लक्षणाघटितानि लक्षणानि

४. उपमानोपमेयभावस्यैच्छिकतानिरूपकलक्षणानि।

५. तादूप्यघटितानि लक्षणानि।

तत्र भरतस्तावत् -

[1] र. गं. पू. २९६॥

**स्वविकल्पेन रचितं तुल्यावयवलक्षणम्**
**किञ्चित्सादृश्यसम्पन्नं यद्रूपं रूपकं तु तत्।**
**नानाद्रव्यानुरागाद्यैर्यदौपम्यगुणाश्रयम्**
**रूपनिर्वर्णनायुक्तं तद्रूपकमिति स्मृतम्॥**[2]

इति कारिकया विशिष्टतया रूपकस्वरूपं निर्वक्ति अत्र **यद्रूपं रूपकं तु तत्** इति भरतोक्त्या उपमानोपमेययोस्ताद्रूप्यमेव रूपकमिति प्रतीयते उपमानोपमेयभावश्च रूपकत्वप्रयोजकस्य रूपस्य मूलतया अस्तीति च ज्ञायते।

**१. अभेदघटितानि लक्षणानि**

प्राचीनालङ्कारिकेषु भामहलक्षणे -
उपमेये उपमानस्य तत्त्वरूपणं रूपकमिति स्फुटीकृतम्।[3] तत्त्वं नाम अभेदः। एवञ्च अभेदघटितमिदं रूपकलक्षणम् पण्डितराजोक्तं तादात्म्यघटितं रूपकलक्षणमप्यस्मिन्नेव वर्गेऽन्तर्भवति।

**उपमैव तिरोभूतभेदा रूपकमुच्यते**[4] इति दण्डिलक्षणमपि तिरोभूतभेदप्राधान्यस्योपम्यस्य रूपकत्वं समर्थयति, इत्यभेदघटितमेव रूपकलक्षणं भविष्यति अत्र तु कस्याभेदः कुत्र वर्ण्यते इति शङ्कायाः भामहलक्षणम् इव स्पष्टं समाधानं नोपलभ्यते। एवं रुद्रटोऽपि -
*यत्र गुणानां साम्ये सत्युपमानोपमेययोरभिदा*
*अविवक्षितसामान्या कल्प्यत इति रूपकं प्रथमम्॥*[5]

इत्यभेदपटितमेव रूपकस्य लक्षणं निर्वक्ति किन्त्वत्राप्यभेदस्य प्रतियोग्यनुयोगिनाविमाविति पृथङ्निर्देशो न कृतः। नवीनेषु मम्मटाचार्योक्तम्-

**तद्रूपकमभेदो य उपमानोपमेययोः**[6]
इति रूपकलक्षणमप्येतादृशीं कोटिमेवाधिरोहति।

**२. आरोपघटितानि लक्षणानि**

प्राचीनलक्षणेषु-
**उपमानोपमेयस्य गुणसाम्यात्तत्त्वारोपो रूपकम्॥**[7]
इति वामनोक्त रूपकलक्षणे, नवीनेषु –
**अभेदप्राधान्ये आरोपे आरोपविषयानपवे रूपकम्॥**[8]

इत्यलङ्कारसर्वस्वकारोक्तरूपकलक्षणे आरोपो रूपकम्'[9] इति शोभाकरमित्रोक्तलक्षणे रूपकं रूपितारोपाद्विषये निरपह्नवे'[10] इति दर्पणकारोक्तलक्षणे च आरोपपदस्य श्रुतिः।

**३. लक्षणाघटितानि लक्षणानि**

"श्रुत्या सम्बन्धविरहाद्यत्पदेन पदान्तरम्।
गुणवृत्तिप्रधानेन युज्यते रूपकं हि तत्॥[11]
यदोपमानशब्दानां गौणवृत्तिव्यपाश्रयात्।
उपमेये भवेद्वृत्तिस्तदा तद्रूपकं मतम् ॥"[12]

इत्युभोजराजाभ्यामुक्ते रूपकलक्षणे लक्षणावृत्तिघटिते।

---

2 ना. शा. भा. २ पृ. १३०४, पृ. १३०५॥
3 काव्या. पृ. २८ - उपमानेन यतत्त्वमुपमेयस्य रूप्यते।
गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः॥
4 का. आ. पृ. १००
5 काव्यालं. पृ. १०६॥
6 का.प्र. पृ. २३४॥
7 का. सू. पृ. १६१॥
8 अ.स.पृ. ११५॥
9 अ.र. पृ. ३२॥
10 सा.द. पृ. ५२१॥
11 का.स. पृ. ११ ॥
12 स.कं. प ४ पृ. १७९॥

ISSN : 2583-2271
Vol. - 2, No. 1: 2022

**४.उपमानोपमेयभावस्य ऐच्छिकतानिरूपक-लक्षणानि**

**आरोप रूपकम्**[13] इति लक्षयता शोभाकरमित्रेण तु सादृश्यमूलकस्येव सम्बन्धान्तरमूलकस्य अप्यारोपस्य रूपकत्वं प्रतिपादितम् एवम् -

**तद्रूपकमारोपे यत्रापह्नयते न तद्विषयः॥**[14]

इति विद्याधरोक्तरूपकलक्षणेऽपि विषयपदस्यैव निर्देशात् उपमेयपदस्यानिर्देशाद् उपमानोपमेयभावस्य लक्षणेऽस्मिन् ऐच्छिकत्वमेव।

**५. तादूप्यघटितानि लक्षणानि**

**विषय्यभेदतादूप्यरञ्जनं विषयस्य यत्**[15]

इति कुवलयानन्दे अप्पय्यदीक्षितोक्तं जयदेवरूपकलक्षणमभेदतादूप्यान्यतरघटितम्।

**आरोपविषयस्य स्यादतिरोहितरूपिणः**
**उपरञ्जकमारोप्यमाणं तद्रूपकं मतम्॥**[16] इति विद्यानाथोक्तलक्षणे

**बिम्बाविशिष्टे निर्दिष्टे विषये यद्यनिह्नुते।**
**उपरञ्जकतामेति विषयो रूपकं तदा॥**[17]

इति चित्रमीमांसोक्तलक्षणे च **उपरञ्जकम्, उपरञ्जकताम्** इति पदयोर्यथाक्रमम् **तादूप्यबुद्धिजनकम्, आहार्यतादूप्यनिश्चय-गोचरताम्** इति व्याख्यानात् इदं लक्षणद्वयमपि तादूप्यघटितमेव।

एवमनेकप्रकारैः रूपकलक्षणानि प्राचीननवीनालङ्कारिकैर्निरूपितानि।

प्रचीननवीनालङ्कारिकेषु पञ्चधा वर्गीकृतेषु रूपकलक्षणेषु यद्यप्यभेदघटितलक्षणापेक्षया आरोपघटितलक्षणेषु काचित् स्पष्टताऽस्ति यत् - रूपकेऽभेदः आरोपमर्यादयैव, न तु अध्यवसायमर्यादया इति स्पष्टीकरणम्, तथाऽपि आरोपो नाम **अतस्मिन् तद्बुद्धिः**। स च कदाचित्प्रत्यक्षतो जायेत कदाचिच्च शब्दतो जायेत। तत्र शब्दजन्याभेदबुद्धिरेव निश्चयात्मिका रूपकव्यवहारस्याङ्गं भवति। न त्वन्यादृशी प्रात्यक्षिकी निश्चयात्मिकाभेदबुद्धिः। एतदभिप्रायेणैव पण्डितराजः रूपकलक्षणे शब्दान्निश्चीयमानमुपमानतादात्म्यम् इत्याह। एवं सुसूक्ष्मचिन्तनपुरस्सरं रूपकालङ्कारलक्षणनिर्माण पण्डितराजपूर्ववर्तिष्वालङ्कारिकेषु न क्वचिदपि दृश्यते इति शम्॥

ଔଝଡ଼ଢ଼ଔ

[13] अ.र. पृ. ३२॥

[14] ए. आ. पृ. २७७॥

[15] कु. आ. पृ. १५॥

[16] प्र.रु. पृ. २५०॥

[17] चि.मी. पृ. १७१॥